# ku njavihAryaShTakam 1

# કુઞ્જવિહાર્યષ્ટકમ્ ૧

## Document Information

Text title : Kunjavihari Ashtaka 1

File name : kunjavihAryaShTakam1.itx

Category : aShTaka, vishhnu, krishna, vishnu, rUpagosvAmin, stavamAlA

Location : doc_vishhnu

Author : Rupagoswami

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Description-comments : From stavamAlA (rUpagosvAmivirachitA) Garland of Devotional Prayers stavamAlA

Source : Sthothra Rathnaakaram, edited by N. Bappuravu, 2010

Latest update : August 6, 2016

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 25, 2021

*sanskritdocuments.org*

# કુઞ્જવિહાર્યષ્ટકમ્ ૧

પ્રથમં શ્રીકુઞ્જવિહાર્યષ્ટકં

ઇન્દ્રનીલમણિમઞ્જુલવર્ણઃ ફુલ્લનીપકુસુમાઞ્ચિતકર્ણઃ ।
કૃષ્ણલાભિરકૃશોરસિહારી સુન્દરો જયતિ કુઞ્જવિહારી ॥ ૧॥

રાધિકાવદનચન્દ્રચકોરઃ સર્વવલ્લવવધૂધૃતિચોરઃ ।
ચર્ચરીચતુરતાઞ્ચિતચારી ચારુતો જયતિ કુઞ્જવિહારી ॥ ૨॥

સર્વતાઃ પ્રતિથકૌલિકપર્વધ્વંસનેન હૃતવાસવગર્વઃ ।
ગોષ્ઠરક્ષણકૃતે ગિરિધારી લીલયા જયતિ કુઞ્જવિહારી ॥ ૩॥

રાગમણ્ડલવિભૂષિતવંશી વિભ્રમેણમદનોત્સવશંસી-
સ્તૂયમાનચરિતઃ શુકશારિશ્રોણિભિર્જયતિ કુઞ્જવિહારી ॥ ૪॥

શાતકુમ્ભરુચિહારિદુકૂલઃ કેકિચન્દ્રકવિરાજિતચૂડઃ ।
નવ્યયૌવનલસદ્વ્રજનારીરઞ્જનો જયતિ કુઞ્જવિહારી ॥ ૫॥

સ્થાસકીકૃતસુગન્ધિપટીરઃ સ્વર્ણકાઞ્ચિપરિશોભિકટીરઃ ।
રાધિકોન્નતપયોધરવારીકુઞ્જારો જયતિ કુઞ્જવિહારી ॥ ૬॥

ગૌરધાતુતિલકોજ્જ્વલફાલઃ કેલિચઞ્ચલિતચમ્પકમાલઃ ।
અદ્રિકન્દરગૃહેષ્વભિસારી સુભ્રુવાં જયતિ કુઞ્જવિહારી ॥ ૭॥

વિભ્રમોચ્ચલદૃગઞ્ચલનૃત્યક્ષિપ્તગોપલલનાખિલકૃત્યઃ ।
પ્રેમમત્તવૃષભાનુકુમારીનાગરો જયતિ કુઞ્જવિહારી ॥ ૮॥

અષ્ટકં મધુરકુઞ્જવિહારી ક્રીડયા પઠતિ યઃ કિલ હારી ।
સ પ્રયાતિ વિલસત્પરભાગં તસ્ય પાદકમલાર્ચનરાગમ્ ॥ ૯॥

ઇતિ શ્રીરૂપગોસ્વામિવિરચિતસ્તવમાલાયાં શ્રીકુઞ્જવિહારિણઃ
પ્રથમાષ્ટકં સમાપ્તમ્ ।

Proofread by PSA Easwaran

*ku njavihAryaShTakam 1*

pdf was typeset on November 25, 2021

Please send corrections to *sanskrit@cheerful.com*